A08

S-2025

# भारतीय-विद्या-भवनम्, मुम्बई - ७

**( सरल - संस्कृत - परीक्षा - विभागः )**

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

**प्रथमं प्रश्नपत्रम् - First Paper**

**( समयः १०.३० तः १२.३० )** **(पूर्णाङ्काः ५०)**

**प्र.१. केचन त्रयः श्लोकाः हिन्द्या/आंग्लभाषया/माध्यमभाषया ससन्दर्भं व्याख्येयाः । ९**

(१) व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः।।

(२) गृहाद् गृहं राक्षसानाम् उद्यानानि च वानरः।
वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः।।

(३) पादमूलगताश्चान्या ददर्श सुमहात्मनः।
पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे।।

(४) चीराजिनजटाधारी रामो भवतु तापसः।
भरतो भजतामद्य यौवराज्यमकण्टकम्।।

**प्र.२. केषाञ्चन त्रयाणां प्रश्नानां संस्कृतभाषया उत्तरं देयम् । ६**

(१) मन्थरा कैकेयीं केन प्रतिज्ञातं वरद्वयं स्मारयामास? (२) तटे क्रीडन्तः बालकाः कान् अपश्यत्? (३) शुभदर्शनः खगः कः? (४) हरिश्चन्द्रः कं स्कीयं राज्यं दत्वा प्रतिज्ञां पूरयामास? (५) खलः किं करोति? (६) रामः लक्ष्मणेन सह कुत्र जगाम?

**प्र.३. अधोलिखितवाक्येषु पञ्चानां हिन्द्या/आंग्लभाषया/माध्यमभाषया अनुवादः कार्यः। ५**

(१) प्रासादेषु राजानः निवसन्ति। (२) सः परमात्मानं चिन्तयति। (३) घनाः वर्षाकाले आकाशे गर्जन्ति । (४) ताः नीलवर्णं दुकूलं धारयित्वा भ्रमणार्थं गच्छन्ति। (५) जनाः तस्मिन् मठे धर्मविषये चिकित्सन्ति। (६) अद्य सायंकाले तस्मिन् मन्दिरे कथावाचनं भविष्यति।

**प्र.४. (क) त्रयाणां समासानां विग्रहवाक्यानि विलिख्य समासनामानि लिखत । ३**

(१) महाबाहुम्। (२) अरिसूदनः। (३) राजमहिष्यः। (४) चित्रविचित्रैः ।

**(ख) त्रयाणां सन्धिविच्छेदं कुरुत । ३**

(१) सर्वेष्वपि। (२) महत्यपि। (३) सोऽर्थम् । (४) प्रजास्तस्य।

**(ग) त्रयाणां लिङ्गवचनविभक्तीः लिखत । ३**

(१) साधुषु। (२) मन्त्रिणः। (३) सर्वेषाम् । (४) महार्हेषु।

**(घ) ''भाष्धातोः'' (आत्मनेपदे,लृट्लकारे) अथवा ''रक्ष् धातोः'' विधिलिङ्-लकारे सर्वाणि रूपाणि लिखत। ३**

**(ङ) त्रयाणां धातुरूपाणां लकार-पुरुष-वचनानि लिखत । ३**

(१) कथयिष्यति। (२) बभूव। (३) नन्देयुः। (४) पश्यति।

**प्र.५. निम्नलिखितवाक्येषु पञ्चानां संस्कृतभाषया अनुवादं कुरुत । ५**

(१) दानी लोग संसार में प्रसिद्ध होते हैं। (२) वह अपनी प्रशंसा करता है। (३) वैद्य उसका इलाज करता है। (४) क्या तुम भी हल चलाओगे? (५) यह इमारत किसकी है?

(६) यज्ञ वायु को पवित्र करता है।

(1) Donors become renowed in this world. (2) He praises himself. (3) The Doctor treats him. (4) Will you also draw the plough?

(5) Whose building is this?( 6) The sacrifice purifies the wind.

**प्र.६. अधोलिखितस्य गद्यखण्डस्य स्वभाषया अनुवादः कार्यः । १०**

शुकः अतीव सुन्दरः खगः भवति। अस्य पक्षौ हरितौ। अस्य चञ्चुः रक्ता भवति। अस्य पुच्छं च परमं शोभनम्। अयम् उष्णप्रदेशेषु जायते। शुकानां बहवः भेदाः भवन्ति। ते केचिद् रक्ताः, केचिद् पीताः, केचिद् कर्बुराः, केचिद् धवलाः केचिद् श्यामाश्च भवन्ति। अस्माकं प्रदेशे प्रायः हरिताः एव भवन्ति शुकाः। शुकं जनाः कीरं, किकिरातं वा वदन्ति। अयं धान्यं, फलानि, बीजानि, लघून् कीटान् च खादति। अयं वनेषु, वाटिकासु, जलाशयानां तटेषु, वृक्षाणां कोटरेषु वा नीडं करोति।

अथवा

रामाभिषेकवृत्तान्तं श्रुत्वा मन्थरा नाम दुष्टा दासी कैकेयीं गत्वा अवादीत्, देवि! जानासि राज्ञा किं चिन्तितमिति? स रामं राजानं कर्तुं वाञ्छति। रामे राजनि तव पुत्रः भरतस्तस्याज्ञाकरो दासो भविष्यति। तव तु न कापि गणना भविष्यति। न कोऽपि तदा तवाज्ञां करिष्यतीति त्वमिमं तिरस्कारं कथं सहिष्यसे? तदिदानीं कमप्युपायं कुरु, येन तव पुत्रो राजा भवेत्। तदा कैकेयी त्वमेव कथयोपायमिति तां पर्यपृच्छत्। सा पुरा दशरथेन प्रतिज्ञातं वरद्वयं तां स्मारयामास।

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### द्वितीयं प्रश्नपत्रम् - Second Paper

( समयः २.०० तः ४.०० ) ( पूर्णाङ्काः ५० )

**प्र.१. केचन द्वौ श्लोकौ हिन्द्या /आंग्लभाषया /माध्यमभाषया व्याख्येयौ।** **१०**

(१) यत्रापि कुत्रापि भवन्ति हंसा-हंसा महीमण्डलमण्डलानि।
हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः।।

(२) दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता।
जानकी विषबल्लीभिः परितेव महौषधीः।।

(३) मत्ता गजेन्द्रा मुदिता गवेन्द्रा वनेषु विश्रान्ततराः मृगेन्द्राः।
रम्या नगेन्द्रा नृभृताः नरेन्द्राः प्रक्रीडितो वारिधरैः सुरेन्द्रः।।

**प्र.२. अधस्तनस्य गद्यखण्डस्य हिन्द्या/आंग्लभाषया/माध्यमभाषया व्याख्या कार्या ।** **१०**

एकस्मिन् महारण्ये कश्चित् सिंहः आसीत्। वनस्य नातिदूरे एव सरः आसीत्। तस्मिन् सरसि एकः मण्डूकः अवात्सीत्। कदाचित् मृगेन्द्रः जलं पातुं सरस्तस्य तीरमगच्छत्। जले स्थितस्य तस्य भेकस्य रटनं श्रुत्वा सिंहः भयेन अकम्पयत्। स परितः विलोक्य अवादीत्-अहो! भीषणो ध्वनिः, कुतः अयं समागच्छतीति ज्ञातुं न शक्नोमि। न कोऽपि अत्र दृष्टिपथम् आयाति भयानको जन्तुः, किं पलाय्य प्राणरक्षा कर्तव्या इदानीम्? नहि नहि आपत्सु धैर्यं धरन्ति बुद्धिमन्तः एवं विचार्य स तत्रैव, तथैव च स्थितः यावत् भयकारणं ध्यायति, तावत् स मण्डूकः,उत्प्लुत्य तीरमगच्छत्। सः पुनरपि उच्चैः रटन् तत्रैव सरसः तीरे अतिष्ठत्। तं दृष्ट्वा सिंहः क्रुद्धो भूत्वा अवादीत्। अरे, ईदृक् स्वल्पकायः जन्तुः मृगेन्द्रं माम् उद्वेजयति। ततः स तम् आक्रम्य पादप्रहारेण धूलिसात् अकरोत् ।

**अथवा**

वृक्षा अपि मनुष्या इव भुक्त्वा पीत्वा च जीवन्ति। मूलानि वृक्षाणां मुखानि पादा: वा भवन्ति। ते पादै: पिबन्ति अतएव पादपा: कथ्यन्ते। तेषां मूलानि भूमे: रसं गृहीत्वा सर्वेषु अवयवेषु नयन्ति तेन ते प्रवर्धन्ते पुष्पन्ति-फुल्लन्ति दधति च फलानि। वृक्षान् अपि वर्षावातशीतातपा: बाधन्ते। तेऽपि सुखानि दु:खानि च अनुभवन्ति। तेषु अपि प्राणा: भवन्ति, अतएव ते प्राणिन: इव जायन्ते वर्धन्ते फुल्लन्ति फलन्ति म्रियन्ते च। ते कदापि खगमृग-जलचरनरा इव न चरन्ति इति अचरा: कथ्यन्ते ।

**प्र.३. निम्नलिखितानां प्रश्नानां संस्कृतभाषया उत्तरं देयम्।** **५**

(१) क: वसन्तसेनाया: आगमनं निवेदयति ? (२) का स्वप्ने राक्षसेन्द्रस्य विनाशं राघवस्य च विजयं ददर्श ? (३) का चारुदत्तस्य प्रेयसी आसीत् ? (४) वृक्षा: प्राणिनां कथम् उपकुर्वन्ति ? (५) आपत्सु बुद्धिमन्त: किं कुर्वन्ति ?

**प्र.४. (क) त्रयाणां सन्धिविच्छेदं कुरुत ।** **३**

(१) प्रीतस्तेऽहम् । (२) वृक्षस्तरु:। (३) पापजनैरिव। (४) महत्यपि।

**(ख) त्रयाणां समासनामनिर्देशपूर्वकं विग्रह: कार्य: ।** **३**

(१) महायशा:। (२) निसर्गस्थिता। (३) वसुधाधिप:। (४) दशानन:।

**(ग) त्रीन् पदान् स्ववाक्येषु योजयत ।** **३**

(१) वाटिकासु। (२) मुकुटेन। (३) सर्वेषाम् । (४) प्रज्ञया।

**(घ) ''प्रच्छ्-धातो:''(लोट्लकारे) अथवा ''अर्च्-धातो:'' लुट्-लकारे (अनद्यतन भविष्यत्काले) सर्वरूपाणि लिखत ।** **३**

**(ङ) त्रयाणां पदानां लकारपुरुषवचनानि लिखत।** **३**

धारयति, भूषयिष्यति, मोचयिष्यते, रचयते ।

**प्र.५. निम्नलिखितान् वाक्यान् संस्कृतेऽनुवादं कुरुत ।** **१०**

(१) पाणिनि व्याकरण शास्त्र के महान ज्ञाता थे। (२) भास ने तेरह संस्कृत नाटकों की रचना की। (३) वह धर्म का चिन्तन करता है। (४) वह किसी को दु:ख नहीं देता है। (५) अध्यापक पढाई के विषय में विचार कर रहा है। (६) तुम स्वयं को क्यों नहीं सजाते हो ? (७) उसे कौन शान्त करेगा ? (८) मैं उसके घर जाकर सान्त्वना दूँगा। (९) घोड़ों को कौन हाँकता है ?(१०) तुम क्या गिन रहे हो ?

(1) Panini was a great grammarian. (2) Bhasa composed thirteen plays in Sanskrit. (3) He thinks about religion. (4) He does not hurt anybody. (5) The teacher is thinking about studies. (6) Why don't you beautify yourself? (7) Who will pacify him? (8) I will go to his house and console him. (9) Who drives the horses? (10) What are you counting?

❑ ❑ ❑

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

# संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### तृतीयं प्रश्नपत्रम् - Third Paper

**( समयः १०.३० तः १२.३० )** **( पूर्णाङ्काः ५० )**

**प्र.१. केचन द्वौ श्लोकौ हिन्द्या /आंग्लभाषया /माध्यमभाषया व्याख्येयौ । १०**

(१) गुरोर्नियोगाद्वनितां वनान्ते साध्वीं सुमित्रातनयो विहाय।
गङ्गां निषादाहृतनौविशेषस्ततार सन्ध्यामिव सत्यसन्धः।।

(२) स लक्ष्मणं लक्ष्मणपूर्वजन्मा विलोक्य लोकत्रयगीतकीर्तिः।
सौम्येति चाभाष्य यथार्थभाषी स्थितं निदेशे पृथगादिदेश ।।

(३) मया विहीना विजने वने या रक्षोभिराहृत्य विकृष्यमाणा ।
नूनं निनादं कुररीव दीना सा मुक्तवत्यायतकान्तनेत्रा।।

**प्र.२. वेणीसंहारनाटकस्य संक्षेपेण स्वभाषायां वर्णनं कुरुत। ५**

**प्र.३. निम्नलिखित-गद्यखण्डस्य हिन्द्या /आंग्लभाषया /माध्यमभाषया अनुवादः कार्यः। १०**

चतुष्पदां मध्ये गजः खलु दर्शनीयः पशुः। भूधराकारशरीरस्यास्य कन्दराकारं मुखं लम्बमाना शुण्डा च विलसन्ति। अयं हि सुभ्राभ्यां सुदृढाभ्यां भाति दन्ताभ्याम्। लघुलाङ्गूलमस्य विशाले देहे महाकाशे मशक इव न शोभते। महाबलिष्ठाः भवन्ति करिणः। ते सुन्दरवने, ब्रह्मदेशे, विन्ध्याटवीषु रेवातटेषु, लङ्कायां, अफ्रिकाप्रान्तेषु, सान्द्रवनेष्वन्यत्र च लभ्यते। ते हि प्रायेण मेघश्यामकान्तयः। क्वचिद्धवला अपि श्रूयन्ते। गजाः वन्यफलानि तरूणां छदान् वंशदलानि, नानाविधानि मूलानि, विविधान् कन्दान् , लताः, पत्राणि इक्षून् अन्यानि चारण्यशाकानि भक्षयन्ति। राजद्वारे पालितासु सगलपाशाः सचरणयुगलगाढनिगडाः सस्कन्धबन्धनास्ते बहुविधानि अन्नानि, सरसघासान् , प्रायेणेक्षुकाण्डाश्च चर्वन्तो दृष्टिपथमायाति।

**अथवा**

सोऽपि साधुस्वभाव: यथाशक्ति रमेशस्य लेखे दोषान् दर्शयित्वा मौनमतिष्ठत्। तदा रमेश: सानुनयं प्राह-मित्र ! देहि तव लेखपुस्तकम्। येनाहं त्वल्लिखितान् लेखान् पठित्वा, तत्र शैलीमधीत्य, अनुगृहीतो भवेयम्। हरि: सारल्येन स्वकीयं लेखपुस्तकं रमेशायाददात्। सोऽपि तद् गृहीत्वा त्वरितै: पदै: गृहमगच्छत्। तत्र स सर्वं तत् पुस्तकं सावधानतया पठित्वा लघुना हस्तेन भकारस्य स्थाने मकारं, सकारस्य स्थाने चकारं, तत्र तत्र विसर्गमनुस्वारं च लोपयित्वा सर्वं लेखं दूषयामास निवर्तयामास च सायं हरये तस्य लेखपुस्तकम् ।

**प्र.४. (क) त्रयाणां विग्रहवाक्यानि विलिख्य समासनामानि लिखत ।** **३**

(१) वर्षावातशीतातपा:। (२) यथासुखम्। (३) परोपकारिण:। (४) शत्रुवध:।

**(ख) त्रयाणां सन्धिं विभज्य सन्धिनामानि लिखत ।** **३**

(१) नैकाकिनी। (२) घुणाश्चापि। (३) त्वल्लिखितान्। (४) बहवश्छात्रा:।

**(ग) त्रीणि पदानि स्ववाक्येषु योजयत ।** **३**

(१) झटिति। (२) निकेतनम्। (३) विप्रयोग:। (४) लेखपरीक्षायाम्।

**(घ) त्रयाणां लकार-पुरुष-वचनानि लिखत ।** **३**

(१) अपठन्। (२) निवसन्ति। (३) पठेयु:। (४) चक्रिरे।

**(ङ) ''तन्-धातो:'' अथवा ''राध्-धातो:'' लङ् -लकारे (अनद्यतन-भूतकाले) सर्वरूपाणि लिखत।** **३**

**प्र.५. केषाञ्चित् पञ्चानां वाक्यानां स्वभाषया अनुवाद: कार्य: ।** **५**

(१) आचार्या: शिष्यान् पाठयन्ति। (२) कालिदासेन कुमारसम्भवं महाकाव्यं रचितम्।(३) वयं सर्वे राष्ट्रस्य उत्कर्षाय यतिष्यामहे। (४) नि:स्पृहस्य जगत् तृणम् एव भवति। (५) माता पिता च बालस्य संस्कारसिञ्चनं कुरुत:। (६) अद्य जगत् पर्यावरणस्य रक्षणार्थे चिन्ताशीलं वर्तते।

**प्र.६. केषाञ्चित् पञ्चानां वाक्यानां संस्कृतभाषया अनुवाद: कार्य: ।** **५**

(१) काश्मीर प्रदेश कश्यप ऋषि की तपोभूमि है। (२) उत्तर-रामचरित नाटक का प्रधान रस करुण है। (३) कुमारिल भट्ट बड़े मीमांसक थे। (४) क्षमा वीर का भूषण होता है। (५) राष्ट्रप्रेम सर्वश्रेष्ठ गुण है। (६) श्रद्धावान मनुष्य ज्ञान प्राप्त करता है।

(1) Kashmir is the penance grove of sage Kashyapa.(2) Karuna (pathetic sentiment) is the principal sentiment in the play Uttara-ramacharita. (3) Kumarila Bhatta was the great mimansaka.
(4) Forgiveness is the ornament of a brave person.(5) Patriotism is the best virtue. (6) Faithful person attains knowledge.

❑ ❑ ❑

A11

S-2025

# भारतीय-विद्या-भवनम्, मुम्बई - ७

## ( सरल - संस्कृत - परीक्षा - विभागः )

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

### चतुर्थं प्रश्नपत्रम् - Fourth Paper

**( समयः २.०० तः ४.०० )** **( पूर्णाङ्काः ५० )**

**प्र.१. अधस्तनेषु केचन द्वौ श्लोकौ हिन्द्या /आंग्लभाषया/माध्यमभाषया व्याख्येयौ।** **१०**

(१) केचिद् वदन्ति धनहीनजनो जघन्यः केचिद् वदन्ति गुणहीनजनो जघन्यः।
व्यासो वदत्यखिलवेदविशेषविज्ञः नारायणस्मरणहीनजनो जघन्यः।।

(२) नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम्।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत्।।

(३) उभयमेव वदन्ति मनीषिणः समयवषितया कृतकर्मणाम्।
बलनिषूदनमर्पयतिं च तं श्रमनुदं मनुदण्डधरान्वयम्।।

**प्र.२. दशरथस्य राज्यशासनवर्णनं स्वभाषया संक्षेपेण कुरुत।** **१०**

**प्र.३. अधस्तनेषु द्वौ समाश्रित्य स्वभाषया निबन्धौ लेख्यौ ।** **१०**

(१) कुमारसम्भवम्।
(२) नैषधीयचरितम्।
(३) किरातार्जुनीयम्।

**प्र.४. अधस्तनेषु द्वयोः कव्योः स्वभाषया परिचयो देयः ।** **१०**

(१) भासः।
(२) कालिदासः ।
(३) बाणभट्टः।

**प्र.५. अधस्तनस्य गद्यखण्डस्य स्वभाषयाऽनुवादः कार्यः ।** **१०**

संग्रामसिंहस्यापि कामना न च पूर्तिमियाय। फतेहपुर-सिकरी आगरापार्श्वे विशालायां युद्धभूमौ महज्जन्यमजनि। राजपूतसैनिकैरदृष्टपूर्वा वीरता प्रदर्शिता यत् मुगलसेनाया नवीनायुधसज्जाया अपि महदाश्चर्यमभाजि। सप्रयासोऽपि संग्रामः साफल्यं न अलभत। जातिद्रोहिणा केनापि दुष्टेन बाबरेण सह सम्पर्कात् असीतिव्रणाघातपीडितश्छिन्नैकपादबाहू राणा संग्रामसिंहः आघातावस्थायामेव कस्मिंचिद् सैनिकशिविरे निष्करुणं व्यापादितः। यस्यैकः पुत्रोऽभूत्, उदयसिंहः। अयं यद्यपि स्वपितेवाभून्नोजस्वी वीरो वीरस्थापि पन्नाधातुः प्रबलया प्रेरणयायं महत्कार्यमकार्षीत्। अनेनापि माननीयाया मातृस्वरूपा पन्नाया आदेशेन सराजपरिवारेण राजमहालयो विसृष्टः, यदा भारतवर्षस्य प्रभाववता मुगलशासकेन सम्राजा अकबरेण चित्तौड़दुर्गः आक्रान्तः। अकबरः कामयते स्म,यत्तस्य कोऽपि अरिणं चाङ्गीकृतः स्यात् सरण्यभावेन मेवाडशासनेन ।

**अथवा**

अवनिपतिस्तु दूरादेव दृष्ट्वा अतिदयितं तनयं तदवस्थोऽपि निर्भरस्नेहावर्जितः, प्रधावन्मनसा प्रसार्य भुजौ एहि एहि इति आह्वयन् शरीरार्धेन शयनादुद्गात्। ससम्भ्रममुपसृतञ्चैनं विनयावनम्रमुन्नमय्य बलादुरसि निवेश्य मज्जन्निवामृतमये महासरसि, पीडयन्नङ्गैरङ्गानि, कपोलेन कपोलम् अवघट्टयन् विस्मृतज्वर-सञ्ज्वरः सुचिरम् आलिलिङ्ग, पस्पर्श च पुनः पुनर्वेपथुमता पाणितलेन। क्षयक्षामकण्ठश्च स कृच्छ्रादिवावदत् - वत्स! कृशोऽसि इति। भण्डिस्त्वभणत्-देव! तृतीयमहः कृताहारस्यास्याद्य इति।

❑ ❑ ❑